# विभक्तिः

१६ – ०९.०४.२०१६

व्योम-संस्कृत-पाठशाला

www.sanskritfromhome.in

# मङ्गलम्

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः।
रामात् नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# मङ्गलम्

गुरुरेव गतिः गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे।
न गुरोः परमं शिशुरस्मि गुरोः
मतिरस्ति गुरौ मम पाहि गुरो॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# पुनरावर्तनम्

- चतुर्थीविभक्तिः
  - सम्प्रदानम् १ – दानक्रियायाः उद्देश्यम्
  - सम्प्रदानम् २ – रुच्-धातोः प्रयोगे प्रीयमाणः
  - सम्प्रदानम् ३ – क्रुध्-द्रुह्-ईर्ष्य्-असूय् इत्येतेषां प्रयोगे कोपपात्रम्
  - उपपदचतुर्थी – नमः

# पुनरावर्तनम्

- चतुर्थीविभक्तिरूपाणि
  - बालाय बालाभ्याम् बालेभ्यः
  - बालिकायै बालिकाभ्याम् बालिकाभ्यः
  - नार्यै नारीभ्याम् नारीभ्यः
  - फलाय फलाभ्याम् फलेभ्यः

# पुनरावर्तनम्

| | | |
|---|---|---|
| तस्मै | ताभ्याम् | तेभ्यः |
| तस्यै | ताभ्याम् | ताभ्यः |
| तस्मै | ताभ्याम् | तेभ्यः |
| एतस्मै | एताभ्याम् | एतेभ्यः |
| एतस्यै | एताभ्याम् | एताभ्यः |
| एतस्मै | एताभ्याम् | एतेभ्यः |
| मह्यम् | आवाभ्याम् | अस्मभ्यम् |
| तुभ्यम् | युवाभ्याम् | युष्मभ्यम् |

# उपपदचतुर्थी – कल्पते/जायते/भवति

- भक्तिः ज्ञानाय कल्पते।
- व्यायामः आरोग्याय कल्पते।
- हिंसा पापाय भवति।
- दुर्व्यवहारः दुःखाय भवति।

# अभ्यासः - १

- अभ्यासः – प्रावीण्यम्
- परोपकारः – पुण्यम्
- परपीडनम् – पापम्
- यौवनम् – गर्वः
- प्रभुत्वम् – अविवेकः
- सम्पत्तिः – अहङ्कारः
- विद्या – विवादः
- धनम् – मदः
- शक्तिः – परपीडनम्
- विद्या – ज्ञानम्
- धनम् – दानम्
- शक्तिः - रक्षणम्

# उपपदचतुर्थी – अन्यानि पदानि

- स्वस्ति
- स्वाहा
- स्वधा
- वषट्
- सुखम्
- हितम्

# गत्यर्थक-कर्मपदात् चतुर्थी

- सः गृहं गच्छति – सः गृहाय गच्छति।
- बालिका शालां याति – बालिका शालायै याति।
- रामः वनं व्रजति – रामः वनाय व्रजति।

# अभ्यासः – २

देवालयः

सभा

यज्ञशाला

अटवी

**गच्छति**

नदी

मन्दिरम्

गृहम्

ग्रामः

# तुमुनः कर्मपदात् चतुर्थी

सीता पुष्पाणि आनेतुम् उद्यानं गच्छति ।
सीता पुष्पाणि आनेतुम् उद्यानं गच्छति ।
सीता पुष्पाणि आनेतुम् उद्यानं गच्छति ।
सीता पुष्पाणि उद्यानं गच्छति ।
सीता पुष्पेभ्यः उद्यानं गच्छति ।
सीता पुष्पेभ्यः उद्यानं गच्छति ।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# तुमुनः कर्मपदात् चतुर्थी

- बालकः फलानि क्रेतुं दश रूप्यकाणि ददाति।
- बालकः फलेभ्यः दश रूप्यकाणि ददाति।

- दुदोह गां स यज्ञाय सस्याय मघवा दिवम्। (रघु० १.२६)
- स राजा यज्ञाय यज्ञं कर्तुं गां भुवं दुदोह। मघवा देवेन्द्रः सस्याय सस्यं वर्धयितुं दिवं स्वर्गं दुदोह।

# अभ्यासः - ३

- गोविन्दः पुस्तकानि क्रेतुम् आपणं गच्छति।
- बालकः पाठं पठितुं शालां गच्छति।
- प्रेक्षकाः सङ्गीतं श्रोतुं कलामन्दिरं गच्छन्ति।
- मक्षिकाः मकरन्दं पातुं पुष्पाणि अन्विष्यन्ति।
- वटुः भिक्षां याचितुं गृहात् गृहम् अटति।
- कृषिकाः सस्यानि वर्धयितुं श्रमं वहन्ति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# तादर्थ्ये चतुर्थी

- प्रकृति-विकृतिभावः
  - यूपाय दारु।
  - कुण्डलाय हिरण्यम्।
- उपकार्य-उपकारकभावः
  - भिक्षुकाय अन्नम्।
  - विप्राय गौः।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - ४

- नूपुरे – रजतम्
- द्वारम् – काष्ठम्
- घृतम् – नवनीतम्
- घटाः - मृत्तिका
- बाणाः – अयः
- ऊरुकम् - वस्त्रम्
- बालाः – वस्त्राणि
- याचकाः – भोजनम्
- योधः – आयुधम्
- कृषिकाः – साहाय्यधनम्
- दरिद्राः – गृहाणि
- अम्बा - शाटिका

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# चतुर्थीविभक्तिः - विशिष्टप्रयोगाः

- बालिका पुष्पेभ्यः स्पृहयति।
- गोविन्दः कृष्णाय शतं धारयति।
- रामः महर्षिभ्यः राक्षसवधं प्रतिश्रृणोति।
- सीता रावणं तृणाय मन्यते।
- गोपी कृष्णाय तिष्ठते।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# रटनम्

व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |